"तथा वृत्रवधे प्राप्ते साहाय्यार्थं हतो मया ॥"
अस्य विशेषविवरणन्तु देवीभागवते षष्ठस्कन्धे १ अध्यायमारभ्य द्रष्टव्यम् ॥ * ॥) मेघः । (यथा, ऋग्वेदे । ३ । ३३ । ६ ।
"इन्द्रो अस्मा अरदद्वज्रबाहु-
रपाहन् वृत्रं परिधिं नदीनाम् ।"
"वृत्रं वृणोति आकाशमिति वृत्रो मेघस्तं मेघमपाहन् जघान ।" इति तद्भाष्ये सायणः ।) पर्व्वतविशेषः । इति मेदिनी ॥ इन्द्रः । इति विश्वः ॥ शब्दः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वृत्रद्विट्, [ष्] पुं, (वृत्रं द्वेष्टीति । द्विष् + क्विप् ।) इन्द्रः । इति हेमचन्द्रः ॥

वृत्रभोजनः, पुं, गम्भीरः । समठ इति ख्यातः । इति शब्दचन्द्रिका ॥

वृत्रहा, [न्] पुं, (वृत्रं हतवान् । हन् + "ब्रह्मभ्रूणवृत्रेषु क्विप् ।"३ । २ । ८७ । इति क्विप् ।) इन्द्रः । इत्यमरः ॥ (यथा, भागवते ।६।७।१६।
"अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्रहा ॥"
यथा च ऋग्वेदे । १ । १०६ । ६ ।
"इन्द्रं कुत्सः वृत्रहणं शचीपतिम् ॥"
"वृत्रहणं वृत्राणां शत्रूणां हन्तारम् ।" इति तद्भाष्ये सायणः ॥)

वृत्रारिः, पुं, (वृत्रस्यारिः ।) इन्द्रः । इति शब्दायुधः ॥

वृथा, व्य, निरर्थकः । तत्पर्य्यायः । मुधा २ व्यर्थकम् ३ अविधिः ४ । इत्यमरः ॥ यथा,—
"अदत्तपाशिको यामो अदाशीकश्च यद्गृहम् ।
अनाप्यभोजनं यत्र वृथा तदिति मे मतिः ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥
अपि च ।
"वृथा वृष्टिः समुद्रस्य तृप्तस्य भोजनं वृथा ।
वृथा दानं समृद्धस्य नीचस्य सुकृतं वृथा ॥"
इति गारुडे ११५ अध्यायः ॥

वृथाजन्म, [न्] क्ली, (वृथा निरर्थकं जन्म ।) निरर्थकजननम् । यथा,—
"वृथा जन्मानि चत्वारि वृथा दानानि षोड़श ।
तान्यहं संप्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
अपुत्रस्य वृथा जन्म धर्म्मबाह्या नराः सदा ।
परपाकं सदाश्नन्ति परतापरताश्च ये ॥"
इत्याद्ये वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥ अपि च ।
"येन श्रुतं भागवतं पुराणं
नाराधितो यैः पुरुषः प्रधानम् ।
मुखे हुतं येन धरामराणां
तेषां वृथा जन्म नराधमानाम् ॥"
इति पुराणम् ॥

वृथादानं, क्ली, (वृथा निरर्थकं दानम् ।) निष्फलदानम् । तत् षोड़शविधम् । यथा,—
"देवपितृविहीनं यदीश्वरेभ्यः सदोषतः ।
दत्वानुकीर्त्तनाच्चैव वेदाभिशतत्यागिने ॥
अन्यायोपार्ज्जितं दानं व्यर्थं ब्रह्मघ्ने तथा ।
गुरवेऽनृतवक्त्रे यः स्तेनाय पतिताय च ॥
कृतघ्नाय च यद्दत्तं सर्व्वदा ब्रह्मविद्विषे ।
याचकाय च सर्व्वस्य वृषल्याः पतये तथा ॥
परिचारकाय भृत्याय सर्व्वत्र पिशुनाय च ।
इत्येतानि तु राजेन्द्र वृथादानानि षोड़श ॥"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥
अन्यच्च । न्यायमार्गेण यद्दत्तं तत् सप्तविधमपि पुनर्नापहर्त्तव्यम् । यत् पुनरन्यायेन दत्तं तदत्तं षोड़शमपि प्रत्याहर्त्तव्यमेव । इत्यर्थादुक्तं भवति ।
नारदेन च ।
"दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकम् ।"
इति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम् ।
"पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥
अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितम् ।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतम् ॥"
इति मिताक्षरा ॥

वृथामांसं, क्ली, (वृथा निरर्थकं मांसम् ।) देवपितृशून्यमांसम् । तद्भक्षणे प्रेतत्वं भवति । यथा,
"वृथारेता वृथामांसो वृथावादी वृथामतिः ।
निन्दको द्विजदेवानां स प्रेतो जायते नरः ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥

वृद्धं, क्ली, शैलजनामगन्धद्रव्यम् । इत्यमरः ॥

वृद्धः, पुं, वृद्धदारकः । इति राजनिर्घण्टः ॥

वृद्धः, त्रि, (वृधु वृद्धौ + क्तः । "वस्य विभाषा ।" ७ । २ । १५ । इति नेट् ।) गतयौवनः । प्रवृद्धः । (यथा, मनुः । २ । १५६ ।
"न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥")
पण्डितः । इति मेदिनी ॥ आद्यस्य पर्य्यायः । प्रवयाः २ स्थविरः ३ जीनः ४ जीर्णः ५ जरन् ६ । इत्यमरः ॥ यातयामः ७ जर्ज्जरः ८ । इति राजनिर्घण्टः ॥ पलितः । इति जटाधरः ॥

वृद्धकाकः, पुं, (वृद्धः काकः ।) काकविशेषः । दाँड़काक इति भाषा । तत्पर्य्यायः । द्रोणकाकः २ दग्धकाकः ३ शत्रुकाकः ४ पर्व्वतकाकः ५ वनाश्रयः ६ काकोलः ७ । इति हेमचन्द्रः ॥

वृद्धगङ्गा, स्त्री, (वृद्धा गङ्गा ।) नदीविशेषः ॥ बुढ़ीगङ्गा इति ख्याता । यथा,—
"अस्ति नाटकशैले तु सरो मानससन्निभम् ।
यत्र सार्द्धं शैलपुत्र्या जलक्रीड़ां सदा हरः ॥
कुरुते नरशार्द्दूल स्वर्णपङ्कजशोभिते ।
तस्य पश्चान्मध्यपूर्व्वभागेभ्यश्च सरित्त्रयम् ॥
अवतीर्य्य प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ॥
दिग्गजाः स्नेहसंजाताः तेन दिक्करिका स्मृता ।
मध्यभागात् स्मृता या तु शङ्करेणावतारिता ॥
वृद्धगङ्गाह्वया सा तु गङ्गेव फलदायिनी ॥
या निःसृता पूर्व्वभागात्तस्माद्गिरिवरान्नदी ।
स्वर्णश्रीवेति विख्याता सा गङ्गासदृशी फले ॥"
इति कालिकापुराणे कामरूपपीठनिर्णयनाम ८२ अध्यायः ॥

वृद्धत्वं, क्ली, (वृद्ध + त्व ।) वृद्धस्य भावः । तत्पर्य्यायः । स्थाविरम् २ । इत्यमरः ॥ वार्द्धक्यम् ३ वार्द्धकम् ४ । इति शब्दरत्नावली ॥ (यथा, रघुः । १ । २३ ।
"अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्म्मरतेरासीद्वृद्धत्वं जरसा विना ॥")
बाल्यादेरवधिमाह सुश्रुतः ।
"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा ।
ऊनषोड़शवर्षस्तु नरो बालो निगद्यते ॥
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक् ।
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम् ॥
तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः ॥
मध्ये षोड़शसप्तत्योर्मध्यमः कथितो बुधैः ।
चतुर्था मध्यमं प्राहुर्युवा द्वात्रिंशतो मतः ॥
चत्वारिंशत्समा यावत्तिष्ठेद्वीर्य्यादिपूरितः ।
ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः ॥"
वीर्य्यादीत्यादिशब्देन रसादिसर्व्वधात्विन्द्रियबलोत्साहा उच्यन्ते । क्षीणः सर्व्वधात्विन्द्रियबलोत्साहैर्हीनः ।
"ततस्तु सप्ततेरूर्द्ध्वं क्षीणधातुरसादिकः ।
क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने ॥
वलीपलितखालित्ययुक्तः कर्म्मसु चाक्षमः ।
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ॥
बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमेऽधिकम् ।
वार्द्धक्ये वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत् ॥"
उपक्रमेत् चिकित्सेत् । तन्त्रान्तरे तु ।
"बाल्यं वृद्धिश्छविर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ ।
बुद्धिः कर्म्मेन्द्रियं चेतो जीवितं दशतो ह्रसेत् ॥"
इति भावप्रकाशः ॥

वृद्धदारकः, पुं, (वृद्धो दारको बालक इव यस्मात् ।) वीरताड़कवृक्षः । इति भरतः ॥ बिद्दड़क् इति वीजताड़का इति च वङ्गभाषा । बिधारा इति हिन्दीभाषा । तत्पर्य्यायः । ऋष्यगन्धा २ छगलान्त्री ३ आवेगी ४ जुङ्गः ५ । इत्यमरः ॥ ऋष्यप्रोक्ता ६ छगलाङ्घ्री ७ छगला ८ अन्त्री ९ जुङ्गा १० । इति तट्टीका ॥ छगली ११ जुङ्गकः १२ श्यामः १३ । इति जटाधरः ॥ वृष्यगन्धा १४ छगलान्त्रिका १५ । इति शब्दरत्नावली ॥ दीर्घवालुका १६ छागलान्त्रिका १७ वृद्धः १८ कोटरपुष्पी १९ अजान्त्री २० वृद्धदारु २१ । ग्रन्थान्तरे कोटरपुष्पीस्थाने वृद्धकोटरपुष्पीति पाठः । अस्य गुणाः । मौर्ख्यत्वम् । पिच्छिलत्वम् । कफवातकासामदोषनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥ अन्यच्च ।
"रसायनो वृद्धदारः शोथवातामवातजित् ।"
इति राजवल्लभः ॥